# आदित्य हृदयं

ध्यानंः

नमस्सवित्रे जगदेक चक्षुषे
जगत्प्रसूति स्थिति नाश हेतवे
त्रयीमयाय त्रिगुणात्म धारिणे
विरिंचि नारायण शंकरात्मने

1. ततो युद्ध परिश्रांतं समरे चिंतयास्थितं
रावणं चाग्रतो दृष्ट्वा युद्धाय समुपस्थितं

2. दैवतैश्च समागम्य द्रष्टुमभ्यागतो रणं
उपागम्याब्रवीद्राममगस्त्यो भगवानृषिः

3. राम राम महा बाहो शृणु गुह्यं सनातनं
येन सर्वानरीन् वत्स समरे विजयिष्यसि

4. आदित्य हृदयं पुण्यं सर्व शत्रु विनाशनं
जयावहं जपेन्नित्यमक्षय्यं परमं शिवं

5. सर्व मंगळ मांगळ्यं सर्व पाप प्रणाशनं
चिंता शोक प्रशमनमायुर्वर्धनमुत्तमं

6. रश्मिमंतं समुद्यंतं देवासुर नमस्कृतं
पूजयस्व विवस्वंतं भास्करं भुवनेश्वरं

7. सर्व देवात्मको ह्येष तेजस्वी रश्मि भावनः
एष देवासुरगणान् लोकान् पाति गभस्तिभिः

8. एष ब्रह्मा च विष्णुश्च शिव स्कन्दः प्रजापतिः
महेंद्रो धनदः कालो यमस्सोमोह्यपां पतिः

9. पितरो वसवस्साध्या ह्यश्विनौ मरुतो मनुः
वायुर्वह्निः प्रजाप्राण ऋतुकर्ता प्रभाकरः

10. आदित्यस्सविता सूर्यः खगः पूषा गभस्तिमान्
सुवर्ण सदृशो भानुर्हिरण्य रेता दिवाकरः

11. हरिदश्वस्सहस्रार्चिस्सप्त सप्तिर्मरीचिमान्
तिमिरोन्मथनश्शंभुस्त्वष्टा मार्तांड अंशुमान्

12. हिरण्य गर्भश्शिशिरस्तपनो भास्करो रविः
अग्निगर्भोदितेः पुत्रश्शंखश्शिशिर नाशनः

13. व्योमनाथस्तमो भेदी ऋग्यजुस्साम पारगः
घन वृष्टिरपां मित्रो विंध्य वीथी प्लवंगमः

14. आतपी मंडली मृत्युः पिंगळस्सर्व तापनः
कविर्विश्वो महा तेजा रक्तस्सर्व भवोद्भवः

15. नक्षत्र ग्रह ताराणामधिपो विश्व भावनः
तेजसामपि तेजस्वी द्वादशात्मन्नमोस्तुते

16. नमः पूर्वाय गिरये पश्चिमायाद्रये नमः
ज्योतिर्गणानां पतये दिनाधिपतये नमः

17. जयाय जयभद्राय हर्यश्वाय नमोनमः
नमो नमस्सहस्रांशो आदित्याय नमोनमः

18. नम उग्राय वीराय सारंगाय नमोनमः
नमः पद्म प्रबोधाय मार्तांडाय नमोनमः

19. ब्रह्मेशानाच्युतेशाय सूर्यायादित्य वर्चसे
भास्वते सर्व भक्षाय रौद्राय वपुषे नमः

20. तमोघ्नाय हिमघ्नाय शत्रुघ्नायामितात्मने
कृतघ्नघ्नाय देवाय ज्योतिषां पतये नमः

21. तप्त चामीकराभाय वह्नये विश्वकर्मणे
नमस्तमोभिनिघ्नाय रुचये लोक साक्षिणे

22. नाशयत्येष वैभूतं तदेव सृजति प्रभुः
पायत्येष तपत्येष वर्षत्येष गभस्तिभिः

23. एष सुप्तेषु जागर्ति भूतेषु परिनिष्ठितः
एष चैवाग्निहोत्रं च फलं चैवाग्निहोत्रिणां

24. वेदाश्च ऋतवश्चैव ऋतूनां फलमेव च
यानि कृत्यानि लोकेषु सर्व एष रविः प्रभुः

25. एनमापत्सु कृच्छ्रेषु कांतारेषु भयेषु च
कीर्तयन् पुरुषः कश्चिन्नावसीदति राघव

26. पूजयस्वैनमेकाग्रो देवदेवं जगत्पतिं
एतत्रिगुणितं जप्त्वा युद्धेषु विजयिष्यसि

27. अस्मिन् क्षणे महा बाहो रावणं त्वं वधिष्यसि
एवमुक्त्वा तदागस्त्यो जगाम च यथागतं

28. एतच्छ्रुत्वा महातेजा नष्ट शोको भवत्तदा
धारयामास सुप्रीतो राघवः प्रयतात्मवान्

29. आदित्यं प्रेक्ष्य जप्त्वातु परं हर्षमवाप्तवान्
त्रिराचम्य शुचिर्भूत्वा धनुरादाय वीर्यवान्

30. रावणं प्रेक्ष्य हृष्टात्मा युद्धाय समुपागमत्
सर्व यत्नेन महता वधे तस्य धृतो भवत्

अथ रविरवदन्निरीक्ष्य रामं
मुदित मनाः परमं प्रहृष्यमाणः
निशिचरपति संक्षयं विदित्वा
सुरगण मध्यगतो वचस्त्वरेति

इत्यार्षे श्रीमद्रामायणे युद्धकांडे आदित्यहृदय स्तोत्रं संपूर्णम्

ध्येयस्सदा सवितृमंडल मध्यवर्ती
नारायणस्सरसिजासन सन्निविष्टः
केयूरवान् मकर कुंडलवान् किरीटी
हारी हिरण्मय वपुर्धृत शंख चक्रः

मित्र रवि सूर्य भानु खगः पूष हिरण्यगर्भ
मरीच्यादित्य सवित्रर्क भास्करेभ्यो नमोनमः

हरिः ॐ तत्सत्